## सङ्घाङ्कलक्षणेष्वञ्यञिञामण् । (१२७/१५०७)

सङ्घादिषु प्रत्ययार्थविशेषणेषु अञन्ताद्, यञन्ताद्, इञन्ताच् च प्रातिपदिकाद् अण् प्रत्ययो भवति तस्येदम् इत्येतस्मिन् [1]विषये । पूर्वस्य वुञोऽपवादः ।

[४७७] घोषग्रहणमत्र कर्तव्यम् । (म.भा. २.३१९)

तेन वैषम्याद् यथासङ्ख्यं न भवति । अञन्तात्[2] – बैदः सङ्घः । बैदोऽङ्कः । बैदं लक्षणम् । बैदो घोषः । यञन्तात्[3] – गार्गः सङ्घः । गार्गोऽङ्कः । गार्गं लक्षणम् । गार्गो घोषः । इञन्तात्[4] – दाक्षः सङ्घः । दाक्षोऽङ्कः । दाक्षं लक्षणम् । दाक्षो घोषः । अङ्कलक्षणयोः को विशेषः ? लक्षणं [5]लक्ष्यभूतस्यैव चिह्नभूतं स्वं यथा विद्या बिदानाम्, अङ्कस्तु गवादिस्थोऽपि गवादीनां स्वं न भवति । णित्करणं ङीबर्थं पुंवद्भावप्रतिषेधार्थं च (म.भा. २.३२०) । बैदी विद्या अस्य बैदीविद्यः ॥

## शाकलाद्वा । (१२८/१५०८)

शाकलशब्दात् सङ्घादिषु [6]प्रत्ययार्थविशेषणेषु वा अण्प्रत्ययो भवति तस्येदम् इत्येतस्मिन् [7]विषये । वुञोऽपवादः । शाकलेन प्रोक्तमधीयते शाकलाः । तेषां सङ्घः शाकलः, शाकलकः । शाकलोऽङ्कः, [8]शाकलकोऽङ्कः । [9]शाकलं लक्षणम्, शाकलकं लक्षणम् । शाकलो घोषः, शाकलको घोषः ॥

## छन्दोगौक्थिकयाज्ञिकबह्वृचनटाञ् ञ्यः । (१२९/१५०९)

सङ्घादयो निवृत्ताः, सामान्येन विधानम् । छन्दोगादिभ्यः शब्देभ्यो ञ्यः प्रत्ययो भवति तस्येदम् [10]इत्येतस्मिन् [11]विषये । वुञणोरपवादः । चरणाद् धर्माम्नाययोः, तत्साहचर्यान् नटशब्दादपि धर्माम्नाययोरेव भवति । छन्दोगानां धर्मो वा आम्नायो वा [12]छान्दोग्यम् । औक्थिक्यम् । याज्ञिक्यम् । बाह्वृच्यम् । नाट्यम् । [13]अन्यत्र छान्दोगं कुलम् इत्यादि ॥

## न दण्डमाणवान्तेवासिषु । (१३०/१५१०)

दण्डप्रधाना माणवाः दण्डमाणवाः, अन्तेवासिनः शिष्याः । तेष्वभिधेयेषु वुञ् प्रत्ययो [14]न भवति । [15]गोत्रग्रहणमिहानुवर्तते, तेन [16]वुञ्प्रतिषेधो विज्ञायते । [17]गौकक्षाः दण्डमाणवाः अन्तेवासिनो वा । दाक्षाः[18] । माहकाः ॥

## रैवतिकादिभ्यश्छः । (१३१/१५११)

[19]रैवतिकादिभ्यः छः प्रत्ययो भवति तस्येदम् इत्येतस्मिन् [20]विषये । गोत्रप्रत्ययान्ता एते, ततः पूर्वेण[21] वुञि प्राप्ते [22]छविधानार्थं वचनम् । [23]रैवतिकीयः । [24]स्वापिशीयः ।

रैवतिक । [25]स्वापिशि । क्षैमवृद्धि । गौरग्रीवि । औदमेयि । औदवाहि । बैजवापि ॥

---

1. अर्थे ह. 2. तावत् इत्यधिकम् फ, अञस्तावत् ब. 3–4. तावत् इत्यधिकम् फ. 5. लक्ष्यस्यैव ब. क.इ.फ. 6. प्रत्ययार्थविशेषेषु ड.इ.फ. 7. अर्थे फ.ह. 8. शाकलोऽङ्कः नास्ति फ. 9. उदाहरणमिदं नास्ति फ. 10. इत्यस्मिन् ब. 11. अर्थे ह. 12. छन्दोग्यः ह. 13. वाक्यमिदं नास्ति ब.ह. 14. न नास्ति फ. 15. गोत्रानुवृत्तिः फ. 16. वुञः प्रतिषेधः ब.क.इ. 17. गौकाक्षाः ब. 18. साङ्क्षाः इत्यधिकम् ब, प्लाक्षाः इत्यधिकम् क.ड.इ. 19. रैवतिकादिभ्यः शब्देभ्यः ब.क.इ.ह, रैवतिक इत्येवमादिभ्यः शब्देभ्यः ड. 20. अर्थे ह. क. 21. च इत्यधिकम् ब. क. 22. विधानम् ब. क. इ. 23. रैवतिकीयम् फ. 24. स्वापितीयः ह. 25. विशिक्षेम द्विपक्षेम वृद्धि शौरग्रीव औदमेधि ह, क्षेमवृद्धिन् ब.क.